# लिङ्गाष्टकम्

Lingashtakam — Eight Verses to the Shivalinga

ब्रह्ममुरारिसुरार्चितलिङ्गं
निर्मलभासितशोभितलिङ्गम् ।
जन्मजदुःखविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥१ ॥

देवमुनिप्रवरार्चितलिङ्गं
कामदहं करुणाकरलिङ्गम् ।
रावणदर्पविनाशनलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥२ ॥

सर्वसुगन्धिसुलेपितलिङ्गं
बुद्धिविवर्धनकारणलिङ्गम् ।
सिद्धसुरासुरवन्दितलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥३ ॥

कनकमहामणिभूषितलिङ्गं
फणिपतिवेष्टितशोभितलिङ्गम् ।
दक्षसुयज्ञविनाशनलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥४ ॥

कुङ्कुमचन्दनलेपितलिङ्गं

पङ्कजहारसुशोभितलिङ्गम् ।

सञ्चितपापविनाशनलिङ्गं

तत्प्रणमामि सदाशिवलिङ्गम् ॥५ ॥

देवगणार्चितसेवितलिङ्गं

भावैर्भक्तिभिरेव च लिङ्गम् ।

दिनकरकोटिप्रभाकरलिङ्गं

तत्प्रणमामि सदाशिवलिङ्गम् ॥६ ॥

अष्टदलोपरिवेष्टितलिङ्गं

सर्वसमुद्भवकारणलिङ्गम् ।

अष्टदरिद्रविनाशितलिङ्गं

तत्प्रणमामि सदाशिवलिङ्गम् ॥७ ॥

सुरगुरुसुरवरपूजितलिङ्गं

सुरवनपुष्पसदार्चितलिङ्गम् ।

परात्परं परमात्मकलिङ्गं

तत्प्रणमामि सदाशिवलिङ्गम् ॥८ ॥

## फलश्रुति

लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।

शिवलोकमवाप्नोति शिवेन सह मोदते ॥